देवभूमि-सौरभम्
Devabhūmisaurabham
Vol 2 Issue 1 July-Dec 2024 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# वाक्यार्थज्ञानहेतुविमर्शः

**प्रो. चन्द्रकला आर्. कोण्डी**
**आचार्या ( साहित्यविभागः)**
**के.सं.वि.श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः**
**मो.9241095021**

**विशेषशब्दाः (Key words)**

वाक्यार्थज्ञानम्, आकाङ्क्षा, योग्यता, आसत्तिः ।

**उद्देश्यम्**

वाक्यार्थज्ञाने आकाङ्क्षायोग्यताऽऽसत्तीनां समवायः कारणं भवति । एतेषु अन्यतमायाः अभावे वाक्यार्थज्ञानं सम्पूर्णतया न भवति । अतः एतासां स्वरूपं किम् ? एतासामभावे वाक्यार्थज्ञानस्य कषतिः कथं जायते इत्याद्यंशाः ज्ञेयाः इति हेतोः वाक्यार्थज्ञानहेतोः विमर्शोऽत्र उद्दिष्टः ।

**पत्रसारः (Abstract)**

वाक्यार्थज्ञानविषये प्राधान्येन मीमांसाशास्त्रे चर्चा-विमर्शादयः कृताः सन्ति । वाक्यार्थज्ञाने आकाङ्क्षा-योग्यता-ऽऽसत्तीनां समवायः कारणम् । अस्मिन् विषये कस्यापि विमतिर्नास्ति । किन्तु एतासां मध्ये प्राथम्यं कस्येत्यस्मिन् विषये कश्चन मतभेदो दृश्यते । मीमांसकाः आकाङ्क्षायाः प्रथमं स्थानं ददति, नैयायिकाः योग्यतायाः, वैयाकरणाश्च आसत्तेः तथा । साहित्यदर्पणकारः विश्वनाथकविराजः नैयायिकाननुसरन् योग्यतायाः प्राथम्यं दत्तवान् "वाक्यं स्याद्योग्यता-काङ्क्षाऽऽसत्तियुक्तः पदोच्चयः" ।

**योग्यता** नाम का ? एकस्य पदस्यार्थेन सह अन्यपदस्यार्थस्य सम्बन्धः - 'एकपदार्थेऽपरपदार्थसम्बन्धो योग्यता' [1] अथवा एकस्य पदस्यार्थेन सह अन्यपदार्थस्य सम्बन्धः युज्यते- 'योग्यता परस्परान्वयप्रयोजकधर्मवत्त्वम् । तेन पयसा सिञ्चतीति वाक्यं योग्यम् । अस्ति च सेकान्वयप्रयोजकद्रवद्रव्यत्वं योग्यता जले कारणत्वेन जलान्वय प्रयोजकार्द्रीकरणत्वं योग्यता सेकक्रियायाम् । अत एव वह्निना सिञ्चतीति वाक्यमयोग्यम् । वह्नेः सेकान्वयप्रयोजकद्रवद्रव्यत्वाभावात्' ।

**आकाङ्क्षा**-प्रतीतिपर्यवसानविरहः । स च श्रोतुर्जिज्ञासारूपः । निराकाङ्क्षस्य वाक्यत्वे 'गौरश्वः पुरुषो हस्ती' इत्यादीनामपि वाक्यत्वं स्यात् ।

**आसत्तिः**-आसत्तिर्बुद्ध्यविच्छेदः । बुद्धिविच्छेदेऽपि वाक्यत्वे इदानीमुच्चारितस्य देवदत्तशब्दस्य दिनान्तरोच्चारितेन गच्छतीति पदेन सङ्गतिः स्यात् ।

अभिप्रायोपस्थापकपदार्थानामव्यवहितोपस्थितिः आसत्तिः । तथा उपस्थापकपदार्थानाम् उपस्थितौ व्यवहितत्वे वाक्यार्थः न प्रतीयते । बुद्धिविच्छेदः द्विधा भवति-

( १ ) कालव्यवधानम्

( २ ) अन्वयानुपयुक्तपदान्तरव्यवधानं चेति ।

एवं बुद्धिविच्छेदस्याभाव एव आसत्तिः ।

एतासु सर्वासु सत्सु वाक्यार्थज्ञानं जायते ।

## वाक्यार्थज्ञानहेतुविमर्शः

[1] सिद्धान्तमुक्तावली : शब्दखण्ड का० ८३

## (Full Paper)

वाक्यशास्त्रमिति प्रथिते मीमांसाशास्त्रे वाक्यार्थविषये मतद्वयं दृश्यते। कुमारिलभट्टानाम् अनुयायिनः भाट्टमीमांसकाः तात्पर्यार्थं वाक्यार्थ इत्यङ्गीकुर्वन्ति। एते अभिहितान्वयवादिनः। प्रभाकराणाम् अनुयायिनः प्राभाकराः वाच्यार्थ एव वाक्यार्थ इति वदन्तः भाट्टानां तात्पर्यार्थं निराकुर्वन्ति। अतः तेषां मते वाक्यस्य अन्वय-पूर्वकम् अभिधाव्यापारेण ज्ञायमानस्य वाच्यार्थस्यैव वाक्यार्थत्वात्तेषां मतस्य विमर्शनस्य न काप्यावश्यकता। किन्तु भाट्टानां मते पदानाम् अभिधया वाच्यार्थाभिधानादारभ्य तात्पर्यवृत्त्या वाक्यार्थप्राप्तिपर्यन्तं काचित् प्रक्रिया दृश्यते। ते वाक्यगतपदानाम् अर्थानां (पदार्थानाम्) समन्वये आकाङ्क्षा-योग्यता-सन्निधीनां हेतुत्वं प्रतिपादयन्ति। एतदङ्गीकुर्वन् कविराजविश्वनाथोऽपि साहित्यदर्पणे वाक्यस्वरूपमेवं प्रस्तौति- "वाक्यं स्याद्योग्यताकाङ्क्षाऽऽसत्तियुक्तः पदोच्चयः" इति। एतासां तिसृणां समुदाय एव वाक्यार्थज्ञाने हेतुः।

यद्यपि आकाङ्क्षा-योग्यता-आसत्तयः तिस्रोऽपि उपचारतः वाक्यरूपपदोच्चयधर्मत्वेन परिगण्यन्ते तथापि मीमांसकाः आकाङ्क्षायाः प्रथमं स्थानं ददति, नैयायिकाः योग्यतायाः, वैयाकरणाश्च आसत्तेः तथा। विश्वनाथकविराजः नैयायिकाननुसरन् योग्यतायाः प्राथम्यं दत्तवान्।

**योग्यता** नाम का ? एकस्य पदस्यार्थेन सह अन्यपदस्यार्थस्य सम्बन्धः - 'एकपदार्थेऽपरपदार्थसम्बन्धो योग्यता' [2] अथवा एकस्य पदस्यार्थेन सह अन्यपदार्थस्य सम्बन्धः युज्यते- 'योग्यता परस्परान्वयप्रयोजकधर्मवत्त्वम्। तेन पयसा सिञ्चतीति वाक्यं योग्यम्। अस्ति च सेकान्वयप्रयोजकद्रवद्रव्यत्वं योग्यता जले कारणत्वेन जलान्वय प्रयोजकार्द्रीकरणत्वं योग्यता सेकक्रियायाम्। अत एव वह्निना सिञ्चतीति वाक्यमयोग्यम्। वह्नेः सेकान्वयप्रयोजकद्रवद्रव्यत्वाभावात्'। [3]

पदार्थानां पारस्परिकसम्बन्धे बाधा विरोधो (अनुपपत्तिः) वा न भवेत्। सैव योग्यता। पदप्रतिपाद्यार्थानाम् अन्योन्यान्वयबोधे हेतुभूतविपरीतबुद्धेरभावः योग्यता। कदाचिद्व्याकरणादिदृष्ट्या वाक्ये कोऽपि विरोधो यद्यपि न दृश्यते, तथापि अर्थः नोपपद्यते। तदा तत्र योग्यताऽभाव उच्यते , यतो हि तदा वाक्यार्थः न ज्ञायते। एतद्यदि नाङ्गीक्रियते अर्थाद्योग्यताभावेऽपि वाक्यमिति यद्यङ्गीक्रियते तर्हि 'वह्निना सिञ्चति' इत्यादिपदसमूहेऽपि वाक्यत्वमङ्गीकरणीयं भवति। किन्त्वत्र यद्यपि व्याकरणरीत्या कोऽपि दोषो नास्ति तथापि 'वह्निकरणकसेक'स्य लोके अभावात् 'जलकरणकसेक'स्यैव सत्त्वात् वह्निना सिञ्चतीत्यस्मिन् वाक्ये पदद्वयस्य मध्ये परस्परं विरोधः सर्वानुभवसिद्ध एव। अतः 'वह्निना सिञ्चती'त्येतत् न वाक्यम्।

तेन, 'योग्यता' पदद्वारोपस्थापितानामर्थानां तादृशः कश्चन धर्मो वर्तते यः धर्मः तेषां पदार्थानां परस्परान्वयस्य सम्बन्धस्य वा प्रयोजको भवति। अत एव पयसा सिञ्चतीत्येतत् वाक्यं भवति, अग्निना सिञ्चतीत्येतन्न भवति। पयश्शब्दस्य जलरूपं द्रव्यमर्थः। पयसि वर्तमानं द्रवत्वं सिञ्चनक्रियया सह वर्तमानस्य सम्बन्धस्य प्रयोजको भवति। सैव पयसि वर्तमाना 'योग्यता'। तथैव सिञ्चतिपदस्यार्थभूतायां सिञ्चनक्रियायमपि काचिद्योग्यता वर्तते 'साधकतम'रूपा। सेकक्रिया आर्द्रकरणरूपप्रयोजनवती। अतः सा क्रिया स्वेन सह वर्तमानं द्रवरूपस्य द्रव्यस्य करण(साधकतम)रूपेणान्वयम् अनायासेन साधयितुं समर्था भवति। अत एव 'पयसा सिञ्चती'त्यत्र अर्थस्य बाधा नास्ति, अर्थात् सः पदोच्चयः 'योग्यः', परस्परान्वितपदार्थानामुपस्थापकत्वात्। किन्तु 'वह्निना सिञ्चती'त्यस्मिन् पदोच्चये पदार्थेषु परस्परान्वयस्य प्रयोजकः कोऽपि धर्मो नास्ति। वह्निः तैजसः पदार्थः, न तु द्रवरूपः। सेचनक्रियान्वयस्तु द्रवरूपद्रव्य एव सम्भवतीति जानीम एव। अत एव वह्नौ तन्न सम्भवति। सिञ्चनक्रियाकरणं न भवति वह्निः। एवं योग्यताभावान्न स पदोच्चयः वाक्यं भवति।

एतत्सर्वं मनसि निधाय अस्याः स्वरूपमेवं वदति विश्वनाथः- **'योग्यता पदार्थानां परस्परसम्बन्धे बाधाभावः। पदोश्चयस्यैतदभावेऽपि वाक्यत्वे 'वह्निना सिञ्चति' इत्याद्यपि वाक्यं स्यात्'** इति।

**आकाङ्क्षा**-प्रतीतिपर्यवसानविरहः। स च श्रोतुर्जिज्ञासारूपः। निराकाङ्क्षस्य वाक्यत्वे 'गौरश्वः पुरुषो हस्ती' इत्यादीनामपि वाक्यत्वं स्यात्।

प्रतीतिर्नाम पदार्थोपस्थितिः। पर्यवसानम्=अन्वयबोधजनकत्वेनेच्छाविरहः, तस्य विरहः=अभावः। तेन

---

[2] सिद्धान्तमुक्तावली : शब्दखण्ड का० ८३

[3] परमलघुमञ्जूषा पृ० २९

प्रतीतिपर्यवसानविरहः इत्यस्य पदार्थोपस्थितेः अन्वयबोधजनकत्वेनेच्छाविरहाभावः= उपस्थितपदार्थाना-मन्वयबोधजनकत्वेनेच्छा । प्रत्येकं पदानामर्थप्रतीतौ अभिप्रेतप्रतीतेः समाप्त्यभावः आकाङ्क्षा । सा च आकाङ्क्षा श्रोतुर्जिज्ञासारूपा । यतः वाक्ये एकस्य पदस्य श्रवणेन श्रोता तदन्वितपमन्विष्यति । 'रामः वनं गच्छती'त्यस्मिन् वाक्ये 'राम'पदश्रवणेन सम्पूर्णवाक्यार्थः न ज्ञायतेऽतः रामशब्दार्थेनान्वितमन्यत् पदं सः श्रोतुमिच्छति । यतः अस्मिन् वाक्ये पदानि परस्परं साकाङ्क्षाणि । अत एव श्रोतुर्जिज्ञासारूपा भवति आकाङ्क्षा । परस्परनिराकाङ्क्षाणां पदानां समूहस्यापि वाक्यत्वाङ्गीकारे 'गौरश्वः पुरुषो हस्ती' इत्यस्मिन् पदसमूहेऽपि वाक्यत्वं वक्तव्यं भवति । अत्र वर्तमानानां पदानां मध्ये परस्परम् आकाङ्क्षा नास्ति । अन्वयार्थम् एकस्य पदस्यार्थः पदान्तरस्यार्थं नापेक्षते । प्रत्येकमपि पदं स्वस्मिन्नेव समाप्तम् । अतः अत्र वाक्यत्वं नास्ति ।

कस्य पदस्यार्थः कस्य पदस्यार्थं स्मारयतीत्याकारकजिज्ञासैव आकाङ्क्षा । एतदेव सिद्धान्तमुक्तावलीकारेणैवं प्रतिपादितम्- 'येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन पदेन सह तस्याकाङ्क्षेत्यर्थः । क्रियापदं विना कारकपदं नान्वयबोधं जनयतीति तेन तस्याकाङ्क्षा'[4] इति । वाक्यरूपपदोच्चये आकाङ्क्षा अत्यन्तमावश्यकी । अपि च सा पदोच्चये स्वाभाविकी एव । अन्यपदार्थस्याकाङ्क्षां विना किञ्चन पदं स्वार्थं स्मारयितुं न शक्नोति । अत एव वाक्यगतस्य प्रत्येकं पदस्य अन्यपदार्थेन सहाकाङ्क्षा भवत्येव । कश्चन वदति-'घटमानय' इति । अत्र 'घटम्' इति कर्मकारकं पदम् 'आनय' इत्यनेन क्रियापदेन विना कथमपि अन्वयबोधं कारयितुं न शक्नोति । अतः 'घटम्' पदस्य 'आनय'पदेन सहाकाङ्क्षा, तथैव 'आनय'पदस्य 'घटम्'पदेन तथा ।

परस्परमर्थस्मारकतैव आकाङ्क्षाया विषयः । सैव श्रोतुर्जिज्ञासारूपा । वाक्यस्थपदेषु एकं पदम् अन्यपदेन सह आकाङ्क्षां करोतीत्यस्य तात्पर्यमिदमेव यत्, 'वाक्यवर्तीनि पदानि परस्परसाकाङ्क्षार्थ-बोधकानी'ति । एतदेव महाभाष्यकारैः स्पष्टीकृतं यत्,

**'परस्परव्यपेक्षां सामर्थ्यमेके । का पुनः शब्दयोर्व्यपेक्षा ? न ब्रूमश्शब्दयोरिति किं तर्हि अर्थयोरिति'**[5]

अपि च महावैयाकरणः नागेशभट्टः महाभाष्यकारसम्मतम् अर्थम् एवं स्पष्टयति- **'वाक्यसमय-ग्राहिका आकाङ्क्षा । सा चैकपदार्थज्ञाने तदर्थान्वययोग्यार्थस्य यज्ज्ञानं तद्विषयेच्छा 'अस्यान्वय्यर्थः कः' इत्येवंरूपा पुरुषनिष्ठैव, तथापि तस्याः स्वविषयेऽर्थे आरोपः। अयमर्थोऽर्थान्तरमाकाङ्क्षति इति व्यवहारात् । इदमेवाभिधानापर्यवसानमित्युच्यते**[6] इति । एकस्य पदस्यार्थज्ञाने जाते तत्सम्बद्ध-पदान्तरस्यार्थजिज्ञासैव 'श्रोतुर्जिज्ञासा' । वस्तुतः वाक्यार्थहेत्वंशेषु त्रिषु आकाङ्क्षैव सर्वप्रथमं तत्त्वं पदसमूहं वाक्यरूपेण भासते । 'अनेनार्थेन अन्वितार्थो क' इत्याकारिका जिज्ञासा श्रोतुर्मनसोऽभिलाषः । अर्थे तस्यारोपः तदर्थं क्रियते 'अर्थ एव जिज्ञासायाः विषय' इति । पदोपस्थापितार्थानां परस्पराकाङ्क्षैव 'प्रतीतिपर्यवसानविरहः' इति वक्तुं शक्यते ।

'पयसा 'सिञ्चति' इत्येष पदसमूहः आकाङ्क्षायुक्तत्वात् वाक्यमिति परिगण्यते । 'पयसा' पदश्रवणसमनन्तरं श्रोता 'सिञ्चति' पदं श्रोतुमिच्छति । तथैव 'सिञ्चति'पदश्रवणानन्तरं 'पयसा' इत्यस्य पदस्य श्रवणेच्छा स्मरणेच्छा वा जायते । अनयोः द्वयोरपि पदयोर्मध्ये साध्यसाधनभावरूपः सम्बन्धः वर्तते । परस्परसाकाङ्क्षत्वात् पदयोः, पदोच्चयोऽयं वाक्यत्वेन परिगण्यते ।

अग्रे विश्वनाथः वदति यत्, 'आकाङ्क्षायोग्यतयोरात्मार्थधर्मत्वेऽपि पदोच्चयधर्मत्वमुपचारात्' इति।

अत्र आकाङ्क्षा-योग्यतयोः वाक्यरूपपदोच्चय(पदसमूह)धर्मत्वमुक्तम् । किन्तु औपचारिकतयैव, न तु मुख्यरूपेण । यतः 'आकाङ्क्षा' अर्थात् वाक्ये एकेन पदेन अन्वितस्य पदान्तरस्य ज्ञानं प्राप्तुं श्रोता इच्छतीति 'आकाङ्क्षा' श्रोतुर्धर्मः भवति, न तु पदधर्मः । तथैव योग्यताऽपि । यतः उपपत्तेः सद्भावोऽसद्भावो वा पदार्थेन सम्बद्धः, न तु पदैः सह । अतः योग्यतापि पदार्थधर्म एव, न तु पदधर्मः । उपचाराश्रयेणैव तयोः वाक्यरूपपदोच्चयधर्मत्वेन व्यवहार युज्यते । आकाङ्क्षा-पदोच्चययोर्मध्ये जन्य-जनकभावसम्बन्धः वर्तते परम्परया । यतः आकाङ्क्षा-वाक्यार्थयोर्मध्ये, वाक्यार्थ-पदोच्चययोर्मध्ये च जन्यजनकभावः साक्षाद्भवति । अत एव आकाङ्क्षा-पदोच्चययोर्मध्ये परम्परया । तथैव योग्यता-वाक्यार्थयोः, वाक्यार्थ-पदोच्चययोश्च साक्षात् आश्रयाश्रयिभावः, तेन योग्यता-पदोच्चययोः परम्परया आश्रयाश्रयिभावः वर्तते । एवं रीत्या आकाङ्क्षा-योग्यतयोः पदोच्चयधर्मत्वं सङ्गच्छते ।

**आसत्तिः**-आसत्तिर्बुद्ध्यविच्छेदः । बुद्धिविच्छेदेऽपि वाक्यत्वे इदानीमुच्चारितस्य देवदत्तशब्दस्य दिनान्तरोच्चारितेन गच्छतीति पदेन सङ्गतिः स्यात् ।

अभिप्रायोपस्थापकपदार्थानामव्यवहितोपस्थितिः आसत्तिः । तथा उपस्थापकपदार्थानाम् उपस्थितौ व्यवहितत्वे वाक्यार्थः

---

[4] सिद्धान्तमुक्तावली, शब्दप्रकरणम्, का. ८४

[5] महाभाष्य-समर्थसूत्रभाष्यम्

[6] परमलघुमञ्जूषा

न प्रतीयते। बुद्धिविच्छेदः द्विधा भवति-

( १ ) कालव्यवधानम्

( २ ) अन्वयानुपयुक्तपदान्तरव्यवधानं चेति।

अद्य 'देवदत्त' इत्युक्त्वा श्वः 'गच्छती'ति वदति चेत् 'देवदत्तः गच्छती'त्यस्य वाक्यस्यार्थः न प्रतीयते। अत्र कालकृतव्यवधानम्। तेन बुद्धिविच्छेदः। 'देवदत्तः गां ग्रामम् आनय गच्छति' इति उच्चरिते सति 'देवदत्तः ग्रामं गच्छति','गाम् आनय' इत्यनयोः वाक्ययोः अर्थः नोपतिष्ठते, अन्वयानुपयुक्तपदान्तरव्यवधानसत्त्वात् (अव्यवहितत्वाभावात्)। साहित्यदर्पणकारेण गिरिभुक्तमग्निमान् देवदत्तेन इति वाक्यमस्य उदाहरणत्वेन दत्तम्। 'गिरिः अग्निमान्' इत्यनयोर्मध्ये 'भुक्तम्' इत्यनेन पदेन व्यवधानं कृतम्। 'भुक्तं देवदत्तेन' इत्यनयोर्मध्ये 'अग्निमान्'पदेन व्यवधानं कृतम्। एवंरीत्या अनन्वयिशब्दानां सत्त्वे शाब्दबोधो न जायते। अतः एतादृशवाक्येषु वाक्यत्वं न भवति।

महावैयाकरणः नागेशभट्टः आसत्तेः लक्षणमेवमाह-**'प्रकृतान्वयबोधाननु-कूलपदाव्यवधानमासत्तिः । गिरिरग्निमानित्यासन्नम्। अनासन्नं च गिरिर्भुक्तमग्निमान् देवदत्तेनेति** [7]**।** एवं प्रकृतान्ययबोधस्य प्रतिकूलपदाव्यवधानमेव 'आसत्तिः' । सिद्धान्तमुक्तावलीकारोऽपि आसत्तेः विषये अमुमेव आशयं प्रकटीकृतवान् -'यत्पदार्थेन यत्पदार्थस्याऽन्योऽपेक्षितस्तयोरन्यवधानेनोपस्थितिः शाब्दबोधे कारणम् तेन 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इत्यादौ न शाब्दबोधः'।

आसत्तिः शाब्दबोधस्य एकम् आवश्यकं कारणम्। परस्परान्वययोग्यपदार्थानाम् अव्यवहितोपस्थितिरेव आसत्तिः। परस्परसम्बद्धपदार्थोपस्थितौ यदि कोऽपि विघ्नबाधा भवति तदा वाक्यमेव न भवति, कथं पुनः वाक्यार्थबोधः ?

विश्वनाथप्रतिपादितं वाक्यलक्षणं तेन प्रतिपादितस्य रसात्मकवाक्यरूपकाव्यलक्षणस्य समर्थनदिशि एव वर्तते । तेन प्रतिपादितं वाक्यस्वरूपं पद-वाक्य-प्रमाणविद्भिः आचार्यैः प्रमाणितमस्ति। 'पदानामभिधित्सितार्थग्रन्थनाकरः संदर्भो वाक्यम्'[8] इत्येतत् वाक्यस्य सरलं स्वरूपनिरूपणम्।

अभिधित्सितार्थगुम्फनं किं किमपेक्षते इत्येष विचारः मनोविज्ञान-तर्क-भाषाविज्ञानानां विषयः। मनोवैज्ञानिकी दृष्टिः आकाङ्क्षां पश्यति। तर्कद्वारा योग्यता निर्णीयते। भाषाविज्ञानम् आसत्तिं प्राबल्येन पश्यति। आसत्त्या एव उपादेयता तद्दृष्ट्या। एवं एतासां तिसृणामपि विशेषता एव अर्थगुम्फनपदसन्दर्भविशेषतारूपेण स्वीकृता वर्तते।

॥ इति शम् ॥

---

[7] परमलघुमञ्जूषा

[8] राजशेखरः-काव्यमीमांसा